National Journal of
Hindi & Sanskrit Research

**ISSN: 2454-9177**
**NJHSR 2025;** 1(61): 166-170
© 2025 NJHSR
www.sanskritarticle.com

**श्रीमती लेलिमा पधानः**
विद्यावारिधि शोधछात्रा,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

**Correspondence:**
**श्रीमती लेलिमा पधानः**
विद्यावारिधि शोधछात्रा,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

# प्रकृतिचित्रणादिदृष्ट्या गीताञ्जलीमेधदूतयोर्मध्ये तुलनात्मकमध्ययनम्

**श्रीमती लेलिमा पधानः**

**शोधसंक्षिप्तिका**

साहित्यजगति विश्वकवित्वेन प्रसिद्धौ साहित्यिकौ स्तः कालिदासः रवीन्द्रनाथश्च। उभयोः बहूनि प्रसिद्धानि ग्रन्थानि सन्ति। तथापि महाकविकालिदासस्य मेघदूतं तथा विश्वकविरवीन्द्रनाथस्य गीताञ्जलिः एतौ तयोः विश्वप्रसिद्धार्थं सहायकौ भवतः। उभौ काव्यौ गीतात्मकं, प्रेमबर्णनसंयुक्तं, प्रकृत्यादि चित्रणात्मकं भवतः इति हेतोः उभयोः अत्र साम्य वैष्यम्यादि उपस्थापनेन साकं तुलनात्मकमध्ययनं क्रियते। यस्मात् पाठकाः उभयोः विश्वविस्थातौ कव्योः प्रसिद्धौ ग्रन्थयोः प्रकृत्यादि वर्णनानां सम्यक् ज्ञानं प्राप्तुं समर्था भवन्ति ।

**कुञ्चिकाशब्दाः**

महाकविकालिदासः, विश्वकविरवीन्द्रनाथः, मेघदूतम्, गीताञ्जलिः, गीताञ्जलिमेघदूतयोर्मध्ये तुलना, ईश्वरस्य विषयः, प्रकृतेः विषयः, मानवतायाः विषयः, मृत्योः विषयः, प्रेम्णः विषयः।

**उपोद्घातः**

महाकविकालिदासः तथा गुरुरवीन्द्रनाथः उभौ साहित्यजगति विश्वकवित्वेन प्रसिद्धिमर्जनं कुरुतः। महाकविकालिदासः एकः सफलः महाकाव्यकारः, खण्डकाव्यकारः, नाट्यकारत्वेन विद्वत्समाजे सुविख्यातम्। तस्य काव्यानुशीलनात् सः दार्शनिकः, संगीतविद्याविशारदः, राजनीतिज्ञानसम्पन्नं, ज्योतिषशास्त्रविशारदः, आयुर्विद्यासम्पन्नं, कामशास्त्रविशारदः, लौकिकज्ञानसम्पन्नश्च अस्ति इति ज्ञायते। तथैव गुरुरवीन्द्रनाथः अपि सफलः साहित्यिकः, काव्यकारः, गीतिकारः, गाल्पिकः, औपन्यासिकः, नाट्यकारः, संगीतज्ञः, अभिनेता, दार्शनिकः समालोचकः, चित्रकारत्वेनश्च सर्वत्र प्रसिद्धं। कालिदासस्य सप्तकृतयः सन्ति, यथा- रघुवंशं, कुमारसम्भवम् एतौ द्वौ महाकाव्यौ, मेघदूतम्, ऋतुसंहारम् एतौ खण्डकाव्यद्वयं तथा अभिज्ञानशाकुन्तलं, विक्रमोर्वशीयं, मालविकाग्निमित्रम् एते नाकत्रयम्। परन्तु विश्वकविरवीन्द्रनाथस्य शताधिकानि काव्यगीतानि बर्तन्ते। उभयोः मेघदूतं तथा गीताञ्जली एतौ प्रसिद्धौ गीतिकाव्यौ नीत्वा अत्र तुलनात्मकमध्ययनं क्रियते। उभौ गीतात्मकौ काव्यौ भवतः । उभयत्र प्रेमवर्णना, प्रकृतिवर्णना, मानवतायाः वर्णनादि विषयाः वर्णितमस्ति। विस्तृतया उभौ काव्योऽपरि वर्णना क्रियते ।

**मेघदूतस्य परिचयः**

मेघदूतः महाकविकालिदासस्य अद्वितीयः सृष्टिः अस्ति। एषा सृष्टिः एव तस्मै "कविकुलगुरु" इति उपाधिं दातुं समर्था अस्ति। मेघदूतः भाषा, भावः, रसः, छन्दः, चरित्रचित्रणं च इत्यादिषु सर्वेषु विषयेषु अद्वितीयः खण्डकाव्यः अस्ति। न केवलं संस्कृते अपि तु विश्वसाहित्ये अपि एतत् उत्तमं काव्यमिति समीक्षकाः वर्णितवन्तः । सहृदयैः एतस्य काव्यस्य प्रशंसा मुक्तकण्ठ्या कृता अस्ति।

रामायणतः तथा ब्रह्मवैवर्तपुराणतः कथावस्तुः संगृह्य महाकविकालिदासः स्वीय प्रस्खातं नाटकम् अभिज्ञानशाकुन्तलं रचना क्रियते। यस्मिन् सः स्व मौलिकप्रतिभायाः प्रयोगं क्रियते, अतः नाटकमिदं

विश्वविख्यातं भवितुमर्हति।

मेघदूतकाव्यं द्विधा विभक्तं, यथा, पूर्वमेघः उत्तरमेघश्च। वल्लभदेवस्य मतानुसारं मेघदूतकाव्ये १११ श्लोकाः तथा मल्लिनाथस्य मते ११८ श्लोकाः सन्ति । पूर्वमेघे प्रयाणं तथा उत्तरमेघे प्राप्तिः विषयः वर्णितः। पूर्वमेघे दीर्घयात्रायाः उत्तरमेधे अलकापुर्याश्च वर्णनं विद्यते ।

अस्मिन् गीतिकाव्ये महाकविकालिदासः, स्वप्रिया विरही रामगिरिआश्रमनिवासी यक्षेण स्वकान्ता प्रति सन्देशं प्रेषयितुं मेघाय याचनां, रामगिरिपर्वतात् अलकापुरीपर्यन्तं मेघमार्गस्य वर्णनं, कुवेरनगर्य्याः सुषमा, यक्षस्य वार्ताश्च वाग्मितापूर्वकं वर्णयति ।

मन्दाक्रान्ताछन्दस्य प्रयोगेण, विप्रलम्भशृंगाररसस्य संयोगेन रचितं मेघदूतं विद्वतजनेषु सादरणीयं भवति। एतस्योपरि बहु टीकाग्रन्थाः अपि उपलभ्यन्ते।

**गीताञ्जलेः परिचयः**

विश्वकविरवीन्द्रनाथठाकुरस्य सर्वाधिकः प्रसिद्धः ग्रन्थः 'गीताञ्जली' प्रथमतः गीतानां संग्रहः काव्यसंग्रहत्वेन वा १९२० तमे वर्षे भारते प्रकाशितः । ततः कविः तम् आङ्ग्लगद्यकाव्येषु परिणमयितवान्, यस्याः नाम 'गीताञ्जली' गीतप्रस्तावः इति।

कविरवीन्द्रनाथः 'गीताञ्जली' ग्रन्थं मध्ययुगीय भारतस्य भक्तिगीतानाम् आधारेण निर्मितवान्। एतैः शब्दैः सह गन्तुं सङ्गीतम् अपि सः लिखितवान् । अस्य ग्रन्थस्य मुख्य विषयः प्रेम एव अस्ति, परन्तु अत्र आध्यात्मिक आकांक्षाणां पार्थिवकामानां च संघर्षस्य विषये अपि वर्णितमस्ति । ग्रन्थेऽस्मिन् कविः यत् चित्रं प्रयुङ्क्ते, तस्य बहुभागः प्रकृत्या एव आगच्छन्ति, मनोभावः च प्रायः निम्नस्तरीयः शान्तः च भवति । अस्य ग्रन्थस्य कारणेन एवं रवीन्द्रनाथठाकूरः १९२३ तमे वर्षे साहित्यस्य नोबेलपुरस्कारः प्राप्तवान् ।

गीतञ्जली द्विधा विभक्ता अस्ति। आरम्भार्थम् एतेषां गीतानाम् बहुभागः कवेः ईश्वरस्य च सम्बादः रूपेण रचितमस्ति। ईश्वरस्य सन्देशाः सर्वदा न उक्ता, चेदपि कविः स्वप्रार्थनाः भावाः च प्रकटयति। कतिपयानि व्यक्तिगत प्रार्थनानि विहाय केचन गीतानि भारतदेशस्य स्वदेशस्य प्रति वा निर्देशितानि सन्ति। दर्शनशास्त्रस्य रहस्यवादस्य तत्वमपि गीताञ्जलि ग्रन्थे वर्णितमस्ति। कविः अत्र वास्तविकजीवनात् दूरं गन्तुं न प्रयतते, परन्तु जीवनस्य आनन्दम् आनन्दयति एव। सः इन्द्रिय अनुभवं न नकारायति, अपितु आध्यात्मिकमनुभवं प्राप्तुं मार्गं परिणमयति । अत्र प्रेमस्य विस्तृततया वर्णनं विद्यते

**गीताञ्जलीमेघदूतयोर्मध्ये तुलना**

महाकविकालिदासस्य मेघदूतमिति खण्डकाव्यं तथा विश्वकवि-रवीन्द्रनाथ ठाकुरस्य 'गीताञ्जली' इति उभयोः काव्ययोर्मध्ये तुलना क्रियते चेत् बहु साम्यं वैषम्यं दृष्टिगोचरीभूतं भवति। उभौ संगीतात्मकौ, प्रेमाधारीभूतौ, मानवभावसम्बलितौ, प्रकृतिचित्र-णात्मकौश्च काव्यौ भवतः। परन्तु मेघदूते मार्गवर्णना, विरहवर्णना, नारीस्वभावः वर्णना, नगरवर्णनादि वर्णितानां विषयाणां अभावः गीताञ्जली काव्ये भवति। उभयोः काव्ययोः वर्णितं विषयाणाम् तुलनात्मकं वर्णनं अधः प्रस्तुयते।

**१) ईश्वरस्य विषयः**

गीताञ्जलिः ईश्वरस्य प्रार्थना अस्ति। ईश्वरस्य विषये गीतानां, स्तुतिनां च संग्रहः अस्ति। ये भारतीयवैष्णवकाव्यस्य प्राचीन-परम्परायां गभीररूपेण निहिताः सन्ति। येषु गूढगुणाः, शाश्वताः उदात्तगुणाः च सन्ति, तेषां मनोभावाः कार्याणि च विस्तृताः सन्ति इति अत्र उल्लिखितमस्ति। ईश्वरस्य विषयः सम्पूर्णं गीताञ्जलि-ग्रन्थे प्रचलति। एकम् उदाहरणं, यथा

"मम जीवनस्य पूर्णपात्रात् किं दिव्यं रसं पिबतुं इच्छसि ।
हे मम कवि, मम नेत्रेण तव सृष्टिं दृष्ट्वा
मम कर्णद्वारे स्थित्वा मौनेन स्वस्थ अविनाशी
मधुरं गीतं शृण्वन् किं आनन्दं लभसे ?
तव लोकाद एव मम मनसि शब्दाः
सृज्यन्ते तेषु गीतानि च तव आनन्दान् जायते ।
प्रेमात् त्वं मम समर्प्य ततः स्वविचारैः
स्वस्य सम्पूर्णम् आनन्दं अनुभवसि ।"[1]

अपरपक्षे, मेघदूते प्रत्यक्षरूपेण ईश्वरं प्रार्थना न क्रियते, परन्तु मेघम् उद्दिश्य पक्षस्य याचना माध्यमेन देवानाम् अत्र वर्णना विद्यते। अस्मिन् खण्डकाव्ये रघुपतेः, कृष्णस्य, पशुपतेः कार्तिकेयस्य, पार्वत्याः, वलरामस्य, विष्णोः कुबेरस्यश्च उल्लेखः क्रियते। महाकविकालिदासः अत्र भगवतः शिवस्य बहुलतया वर्णना क्रियते। उज्जयिनी नगरे महाकालस्य अवस्थितिः भवति इति हेतोः कविना मेघमार्गविर्णनावसरे यक्षमुखेन वक्रपन्थाः भवति चेदपि उज्जयिनीं गमितुं मेघं प्रार्थनां क्रियते । तद्यथा,

**" वक्रः पन्था यदपि भवतः प्रस्थितस्योत्तराशां**
**सौधोत्सङ्गप्रणयविमुखो मा स्म भूरुज्जयिन्याः ।**
**विद्युदामस्फुरितचकितैस्तत्र पौरङ्गनानां**
**लोलापाङ्गैयदि न रमते लौचनैर्वञ्चितोऽसि ॥"[2]**

खण्डकाव्यस्य प्रथमेश्लोके मंगलाचरणे वा अष्टमूर्त्ति शिवस्य बन्दना क्रियते। अन्येषु बहुषु श्लोकेषु अपि भगवतः महाकालस्य महिमायाः वर्णना क्रियते । मेघस्य उपमायां वहु देवानां वर्णना कविना यक्षमुखेन क्रियते।

**२) प्रकृतेः विषयः**

गुरुदेवरवीन्द्रनाथस्य "गीताञ्जली" ग्रन्थे प्रकृतिः विषये अपि कथनं क्रियते। ईश्वरस्य प्रकृतेः च सम्बन्धं अत्र प्रतिफलितं भवति । एतस्य गीतानि सुन्दराणि मनोहारिणि चित्राणि च संयुक्तानि सन्ति, यस्मात् पाठकसमाजे एतत् वहु आदृतानि सन्ति। एतानि मनोहारिणी चित्राणि प्रकृत्यां भारतीयपौराणिककथाषुश्च आगतानि सन्ति । सः प्रकृतिः विषये वदति यत्,

"यदा अहं त्वया सह क्रीडन् आसीत् तदा अहं कदापि न पृष्ठवान् यत् त्वं कोऽसि इति । तस्मिन् समये मम न संकोचः न भयम् आसीत्, मम जीवनं विनोदपूर्णम् आसीत् ।
प्रातः काले त्वां मां सुप्ताद् इव उत्याय क्षेत्रेषु धावनं करोषि।
तेषु दिनेषु भवन्तः यत् गीतं गायन्ति स्म तस्य अर्थं ज्ञातं मम चिन्ता नासीत । मम कण्ठः स्वराणां मेलनं केतुं आरब्धवान् तथा च स्वराणां उत्थान अवस्थासु मम हृदयं नृत्यं कर्तुं आरब्धम्।
इदानीं यदा क्रीडाकालः व्यतीतः तदा सहसा मम पुरतः विचित्रः दृश्यः आगच्छति । अयं जगत् सर्वमौननक्षत्रेण स्तब्धः वाक्हीनः तव पादपङ्कजप्रणतनेत्रः तिष्ठति।"[3]

यतोहि महाकविकालिदासः प्रकृतिकविः आसीत्, अतः तस्य सर्वेषु काव्येषु प्रकृत्याः मनोहरं सर्वोत्तमं च चित्रणं दृश्यते। प्रकृत्याः उभयोः अन्तः बाह्य रुपयोः कविना उत्कृष्टतया चित्रणं क्रियते। मेघदूते अपि प्रकृत्याः अन्तः रूपं, यथा -यक्षस्य पत्न्याः स्वभावः ,पुनश्च बाह्यरूपं, यथा-पर्वत-नद्यादेः वर्णना निखुणतया क्रियते।

मेघदूतखण्डकाव्यस्य प्रथमतः रामगिरिपर्वतस्य वर्णनाप्रसङ्गात् एव प्रकृतेः चित्रणं प्रारभते। रामगिरि आश्रमस्य वृक्षाणां मुदुच्छाया, तडागस्य शुद्धं जलं मनोहरत्वेन चित्रितं वर्तते । यथा हि,

**"यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु**
**स्निग्धच्छायातरुषु वसतिं रामगिर्याश्रमेषु ।।"[4]**

मेघदूतस्य पूर्वभागे प्रकृतेः मनोरमं चित्रं प्रदीयते। वर्षाऋतोः, कृषिक्षेत्रस्य मयूरस्य नृत्यं, मृग-हस्ती-राजहंस-बलाका-शरभादेः स्वभावानां, मन्दं मन्दं गतिशीलं सुमधुरवायोः, चातकाः बलाकाः विषये सुन्दरं वर्णनं क्रियते । यथा,

**"मन्दं मन्दं नुदति पवनश्चानुकुलो यथा त्वां**
**वामश्चायं नदति मधुरं चातकस्ते सगन्धः।**
**गर्भाधानक्षणपरिचयान्नूनमाबद्धमालाः**
**सेविष्यन्ते नयनसुभगं खे भवन्तं बलाकाः ॥"[5]**

मेघदूतकाव्यस्य मुख्यपात्रः भवति मेधः । यत् प्रकृतेः एकः अंगः भवति । प्रथमतः शेषं यावत् मेघस्य, मेघमार्गस्य, मेघस्य आकृतेः च वर्णना क्रियते । कदा मेघः पर्वतस्य शिखरप्रदेशे विश्रामं करोति, कदा मेघः नद्याम् जलपानं करोति , कस्मिन् समये मेघः जल बृष्टिं करोति, पुनश्च सः सन्ध्यासमये महाकालस्य पूजायां जपापुष्पमिव रक्तवर्णं धारणं करोति । यथा हि,

**"पश्चादुच्चै - र्भुजतरूवनं मण्डलेनाभिलीनः।**
**साध्यं तेजः प्रतिनवजपापुष्परक्तं दधानः।।"[6]**

कुलगुरूकालिदासस्य प्रकृतिः सजीवं प्रभावशीलं च अस्ति। अत्र प्रियतमामिव वनितारुपिणी सरिता भ्रूभंगिमा प्रदर्शयति। भानूः, स्वखण्डिता नायिका नलिन्याः काकरविन्दवः रूपकं अश्रूं स्व प्रातः कालीनः कोमलकिरणरूपकं हस्तैः निवारयति दूरीकरोति वा । अत्र कविना प्रकृतेः मानवीकरणं क्रियते। यथा हि,

**"तस्मिन्काले नयन सलिलं योषितां खण्डितानां**
**शान्तिं नेयं प्रणयिभिरतो वर्त्मभानोस्त्य आशु।**
**प्रालेयास्रं कमल बदनात्सोऽपि हर्तुं नलिन्याः**
**प्रत्यावृत्तस्त्वयि कररुधि स्यादनल्पाभ्यसूयः।।"[7]**

महाकविकालिदासः प्रकृत्यां मानवहृदयस्य भावानां वर्णना क्रियते। अन्तः वाह्यश्च प्रकृतेः अविच्छिन्नसम्बन्धं मेघदूते रमणीयत्वेन वर्णीयते।

**३) मानवतायाः विषयः**

विश्वकविरवीन्द्रनाथठाकुरस्य प्रसिद्धं काव्यं गीताञ्जलिः केवलं पुरुषस्य आत्मनः ईश्वरस्य च सम्बन्धस्य विषये न वदति, एतत् पुरुषस्थ आत्मनः अन्यपुरुषाणां च सम्बन्धस्य विषये अपि कथयति । प्रायः मनुष्यस्य महत्वपूर्णान् अधिकारान् अङ्गीकृत्य निर्धनानाम्, विनयशीलानाम् अधिकाराणां कृते ग्रन्थमिदं तिष्ठति । उदाहरणानि यथा,

**"इयं मम प्रार्थना त्वा भगवान्-प्रहरतु हृदि मे दरिद्रमूलं प्रहरतु।**
**हर्षदुःखं सहितुं मे बलं लघु ददातु।**
**मम प्रेम्णः सेवायां फलप्रदं कर्तुं मे बलं देहि।**
**बलं ददातु यत् कदापि दरिद्रान् न निराकर्तुं न वा**
**जानुभ्यां न नमस्यामि अनादरस्य पुरतः।**
**नित्यं तुच्छेभ्यः उपरि मम मनः उच्चैः उत्थापयितुं बलं ददातु।**
**बलं च देहि मम बलं प्रेम्णा तब इच्छायां समर्पयितुं ।।"[8]**

पुनश्च,

"यत्र मनः निर्भयं, यत्र शिरः उच्चैः धारितं, यत्र ज्ञानं मुक्तं, यत्र जगत् लघुगृहभित्तिभिः खण्डैः न विभक्तं, यत्र सत्यस्य गभीरात् शब्दाः निर्गच्छन्ति, यत्र असक्तः प्रयासः समाप्तिं प्रति बाहून्

प्रसारयति, यत्र मृताचारस्य घोरस्य मरुभूमितः तर्कस्य स्पष्टधारा स्वमार्गं न नष्टवान्, यत्र मनः सर्वदा विचाराणां कर्मणां च विस्तारं प्रति गन्तुं प्रयतते, हे मम पिता! एतादृशे दिव्ये स्वातन्त्र्यलोके अस्माकं प्रियदेशः जागरतु ।"[9]

महाकविकालिदासस्य मेघदूते अपि कविना मनुष्यस्य कर्तव्यानामुपरि बहुषु स्थलेषु वर्ण्यते। अत्र अतिथिसत्कारं कथं करणीयं वर्णना विद्यते। यदा यक्षः मेघं पश्यति, तदा सः आतिथ्यं प्रदाय मेघद्वारा दौतकार्यं सम्पादयितुं कल्पयति। निम्नोक्त श्लोकमाध्यमेन एतत् ज्ञायते, यथा हि,

**"प्रत्यासन्ने नभसि दयिताजीवितालम्वनार्थी**
**जीमूतेन स्वकुशलमयीं हारयिष्यन् प्रवृत्तिम्।**
**स प्रत्यग्रैः कुटजकुसुमैः कल्पितार्घाय तस्मै**
**प्रीतः प्रीतिप्रमुखवचनं स्वागतं व्याजहार।।"**[10]

रामगिरिपर्वतस्य वर्णनप्रसङ्गे अपि कविः मानवकर्तव्यस्य उदाहरणं प्रदाय कथ्यते यत्, रामगिरिपर्वतस्य बन्धुः मेघः यदा रामगिरिपर्वतस्य समीपं गच्छति तदा सः तं सम्मानं दास्यति, यतो हि, कृपणोऽपि जनः आश्रयाय संप्राप्तं मित्रं अवलोक्य पूर्वकृतोपकारस्मृत्या पराङ्मुखो न भवति, तादृशः उन्नतः स आम्रकूटः कथं पराङ्मुखः भविष्यति इति । यथा हि,

**"त्वामासारप्रशमितवनोपप्लवं साधु मूर्ध्ना**
**वक्ष्यत्यध्वश्रमपरिगतं सानुमानाम्रकूटः।**
**न क्षुद्रोऽपि प्रथमसुकृतापेक्षया संश्रयाय**
**प्राप्ते मित्रे भवति विमुखः किं पुनर्यस्तथोच्चैः।।"**[11]

पुनश्च, कविः यज्ञस्य मुखे मेघमार्गस्य वर्णनप्रसङ्गे वदति यत्,

**"के वा न स्युः परिभवपदं निस्फलारम्भमयत्नाः ।"**[12]

अर्थात्, यतो हि कथ्यते विफलकर्मप्रयासः सर्वोऽपि तिरस्कारपात्रत्वं प्राप्नुवन्ति। अतः हे मेघ! हिमालये अष्टपदमृगाणां लम्फनयुक्तमार्गं त्यजन्तं अपि भवन्तं लंघयितुं शरभाः प्रयतेरन् । तदानीं त्वं तान् भीषणं करकापातैः इतस्ततविक्षिप्ता विधेहि।

**४) मृत्योः विषयः**

गीताञ्जलिग्रन्थे मृत्योः विषये अपि वर्णना क्रियते। कविना कथ्यते, मृत्युः भयस्य विषयः नास्ति इति। अपितु सः तं आनन्देन स्वागतं करोति, यतः रवीन्द्रनाथस्य मतेन एतत् एकः द्वारः अस्ति, येन केवलं शाश्वतेन सह संयोगः सम्भवति । यथा हि,

"मृत्युः, अहो मम मृत्युः, मम जीवनस्य अन्तिमः सिद्धिः, आगच्छ, मम कर्णान् मधुरं शृणुत। मया तव आगमनं प्रतीक्षितं त्वमेव च मम जीवनस्य सुखदुःखाः सर्वाः सहिताः।

अहं यत् किमपि अस्मि, यत् किमपि मम अस्ति, यत् किमपि आशासे मम प्रेम चे सर्वं भवतः प्रति गहनरुपेण प्रवहति। यथा एव तव नेत्रयोः अन्तिमदृष्टिः मायि पतति, मम जीवनं भवतः सदा भविष्यति।

मणिः तारिताः, माला च वरस्य कृते सज्जा अस्ति । विवाह अनन्तरं वधूः स्वगृहात् प्रस्थास्यति, शून्यरात्रौ स्वामिनं एकमेव मिलति ।"[13]

अतिथिमिव मृत्योः स्वागतं मुक्तहस्तेन करणीयम् । मृत्युः जीवनस्य अन्तः न भवति, जीवनस्य नवीकरणमेव । जीवनस्य अन्तिमः सिद्धिः अस्ति । मृत्युद्वारा एव वयम् आध्यात्मिकं सत्यं ज्ञातुं शक्नुमः, वस्तूनां हृदयं च द्रष्टुं शक्नुमः ।

गीतिकाव्ये मेघदूतेऽपि परोक्षतथा कविना मृत्योः विषयः वर्णितम्। अत्र स्वामी कुवेरस्य शापेन यक्षः एकवर्षं पत्नीविरहेण अभिशप्तं भवति । यस्मात् यक्षः स्व पत्न्याः जीवनधारणार्थं मेघं दूतरूपेण स्वीकृत्य मेघमाध्यमेन तस्याः समीपं स्वस्य कुशलवार्ता प्रेषयति। पुनश्च सः मेघं कथयति यत्,

**"तां चावश्यं दिवसगणनातत्परामेकपत्नी-**
**मव्यापन्नामविहतगतिर्द्रक्ष्यासि भ्रातृजायाम्।**
**आशाबन्धः कुसुमसदृशं प्रायशो ह्यङ्गनानां**
**सद्यः पाति प्रणयिहृदयं विप्रयोगे रुणद्धि।।**[14]

अर्थात्, हे मेघ! कान्तस्य शापमुक्त्यर्थं दिवसगणनायां तत्परा ममप्रियां तव भ्रातृजायाञ्च अविरतगत्या त्वं अवश्यं विलोकयिष्यसि। यतः आशाबन्धनं प्रेमयुक्तं कुसुमसदृशं तथा प्रिहविरहे सहसाभ्रंशनशीलं अवलानानां जीवनं प्रायतः प्रतिवध्नाति । अत्र आशारज्जुः मृत्युतः अपि तारयति इति कथ्यते ।

**(५) प्रेम्णः विषयः**

गीताञ्जलिः ग्रन्थे सुन्दरलिङ्गस्य जनस्य, निपीडितस्य, प्रकृतेः सौन्दर्यस्य, तस्य भिन्नरूपस्य च सत्यस्य तस्य प्रकटीकरणस्य च, देशस्य सर्वशक्तिमानस्य च प्रेम्णः आरभ्य भिन्न-भिन्न-प्रेम रुपाणां बहुलता दृश्यते ।

महाकविकालिदासस्य मेघदूतं श्रृंगाररसात्मकं काव्यं भवति इति कारणात् अत्र प्रथमतः शेषं यावत् प्रेम्णः विषयः वर्णितः । अत्र विप्रलम्भश्रृङ्गाररसः प्रमुखरूपेण स्वीकृतः। प्रेमविरहस्य कष्टस्य अत्र वर्णना विद्यते । अत्र नायकः यक्षः स्व शापस्य कारणात् पत्नीविरहि भूत्वा स्व पत्न्याः प्रति तीव्र आकांक्षायाः अन्वेषणं कृतमस्ति । तस्य प्रेमः भौतिक-दूरता-काल अतिक्रम्य भवति। अत्र मेघः यक्षस्य दूतरुपेण कार्यं कुर्वन् तस्य स्थायिप्रेमस्य मूर्तरूप ददाति, यज्ञस्य भक्ति- आशा - सन्देशं प्रिया प्रति वहति । यक्षस्य पत्नी अपि तस्य पुनरागमनस्य उत्सुकतापूर्वकं प्रतीक्षां करोति। यथा हि, यक्षमुखेन स्व पत्न्याः विरहदशा वर्णनां,

**तां जानीथाः परिमितकथां जीवितं में द्वितीयं**
**दूरीभूते मयि सहचरे चक्रवाकीमिवैकाम्।**
**गाढोत्कण्ठा गुरुषु दिवसेष्वेषु गच्छत्सु वालां**
**जातां मन्ये शिशिरमथितां पद्मिनी वान्यरूपाम्।।**[15]

विरहे अपि नायिका-नायकयोः पुनर्मिलनस्य आशा आकांक्षा संपूर्ण काव्ये स्पर्शयोग्यः मनोरमं च अस्ति।

**उपसंहारः**

महाकविकालिदासस्य मेघदूतं तथा विश्वकविरवीन्द्रनाथठाकुरस्य गीताञ्जलिः, उभयोः काव्योः कनिचित् समानता कानिचित् असमानता अपि परिलक्ष्यते। गीतिकायं भवति चेत् अपि मेघदूतं विप्रलम्भश्रृङ्गारसात्मकं खण्डकाव्यं भवति परन्तु गीताञ्जलिः कतिपयानां गीतानां संग्रहस्थली भवति। उभयत्र ईश्वर-प्रकृति-मानवता- मृत्यु-प्रेम्णःविषयाणां वर्णना विद्यते। परन्तु गीताञ्जलिः आध्यात्मिकपरकं ग्रन्थं भवति अपरपक्षे मेघदूतं विप्रलम्भश्रृङ्गार-रसात्मकं काव्यं भवति। गीतंञ्जली ग्रन्थे दार्शनिकदृष्टया तत्वानां विवेचनं क्रियते, अपरत्र मेघदूते कवेः अनुभूतिनां, प्रतिभायाः, मनोभावानां वर्णना विधते।

वास्तवतः, उभौ काव्यौ गीतिमयं प्रेममयं च काव्यौ स्तः। उभौ काव्यौ विश्वप्रसिद्धं, विद्वत्समाजे आदरणीयं च स्तः।

**सहायक ग्रन्थसूची**


1.Tagore, Rabindranath, Gitanjali, sahitya sarowar publisher, 17 -A, Prabhu Nagar, Near pratap Nagar Agra - 282002 (U.P)
2.Tagore, Rabindranath, The poet's Religion: From Rabindranath Tagore selected Essays. Neal - Delhi: Rupa and co., 2004.
3.Asthana, B.P. Rabindranath Tagore: Gitanjali, Sahitya Bhandar publisher, Meerut.
4.Bandhopadhyay; Debarati. Rabindranath Tagore: A life of Intimacy with Nature. Rupa publication india pvt.Ltd, 2019.
5.Kripalani, krishna. Rabindranath Tagore : A Biography. London: Oxford UP, 1962
6.Paul, S.K. The complete poems of Rabindranath Tagore's Gitanjali. Sarup and Sons publishers, New Delhi, 2006.
7.महाशय, काशीनाथ (अनुवादकः), 'गीताञ्जली' (हिन्दी अनुवादः), वैद्य शिवनारायण मिश्र भिषग्रत्न, प्रकाश पुस्तकालय, कानपुरः
8.Kale. M. R. The meghduta of Kalidasa. Delhi: MotilalBanarasiDas. 2008. print.
9. wilson, H.H. The Meghaduta, or, cloud Messenger. Trans. London: Richard, 1843. web.
10.पाढ़ी, प्रमोदकुमारः, मेघदूतम्, कितावमहल कलेजस्कोयार, कटक- ७५३००३
11. शास्त्री, श्री वैधनाथ झा,मेघदूतम्, चौखम्बा कृष्णदास अकादमी, वाराणसी
12. त्रिपाठी, डा. बाबूराम, मेघदूतम्, महालक्ष्मी प्रकाशन, आगरा-२
13.शर्मा,श्रीकेदारनाथः(हिन्दी व्याख्याकारः), शास्त्री, श्री ब्रह्मशंकरः (सम्पादकः), मेघदूतम्, चौखम्बा संस्कृत संस्थानं, वाराणसी - २२१००१।
14.सिंह, डा. बिजेन्द्रकुमारः, मेघदूतम्, साहित्य भण्डारः, मेरठः।
15.त्रिपाठी, प्रो. राधावल्लभः, संस्कृत-साहित्य का अभिनव इतिहास, विश्वविद्यालय प्रकाशन, वाराणसी।


**पाद टिप्पणी**

[1] गीताञ्जलिः, गीतं - ६५

[2] मेघदूतम्. पू. २८

[3] गीताञ्जलिः, गीतं-९७

[4] मेघदूतम्. पू. १

[5] मेघदूतम्. पू. १०

[6] मेघदूतम्.पू. ३९

[7] मेघदूतम् - पू. ४२

[8] गीताञ्जलिः. गीतं-३६

[9] गीताञ्जलिः. गीतं-३५

[10] मेघदूतम्.पू. ४

[11] मेघदूतम.पू. १७

[12] मेघदूतम्.पू.५७

[13] गीताञ्जलिः, गीतं-९१

[14] मेघदूतम्. पू. ९

[15] मेघदूतम्. उ. २२